ārsha Samyoga

# Tattva bodhaḥ

## with English Transliteration

**ॐ श्री गुरुभ्यो नमः**

**हरिः ॐ**

**॥ अथ श्री शङ्कराचार्य विरचित तत्त्वबोधः प्रकरण ग्रंथम् ॥**

*om śrī gurubhyo namaḥ*

*hariḥ om*

*|| atha śrī śaṅkarācārya viracita tattva bodhaḥ prakaraṇa grantham ||*

**॥ मङ्गलाचरणम् ॥**

*maṅgalācaraṇam*

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम्

मुमुक्षूणां हितार्थाय तत्त्वबोधोऽभिधीयते ॥

*vāsudevendrayogīndraṁ natvā jñānapradaṁ gurum*

*mumukṣūṇāṁ hitārthāya tattvabodho'bhidhīyate*

# Chapter 1

॥ अथ साधनचतुष्टय विचारः ॥

*atha sādhanacatuṣṭaya vicāraḥ*

साधनचतुष्टयसंपन्नाधिकारिणां मोक्षसाधनभूतं तत्त्वविवेकप्रकारं वक्ष्यामः।

*sādhanacatuṣṭayasampannādhikāriṇāṁ mokṣasādhanabhūtaṁ tattvavivekaprakāraṁ vakṣyāmaḥ*

साधनचतुष्टयं किम् ?

*sādhanacatuṣṭayaṁ kim?*

नित्यानित्यवस्तुविवेकः। इहामुत्रार्थफलभोगविरागः।

शमादिषट्कसम्पत्तिः। मुमुक्षुत्वं चेति।

*nityānityavastuvivekaḥ*

*ihāmutrārthaphalabhogavirāgaḥ*

*śamādiṣaṭkasampattiḥ*

*mumukṣutvaṁ ceti*

नित्यानित्यवस्तुविवेकः कः ?

*nityānityavastuvivekaḥ kaḥ ?*

नित्यवस्त्वेकं ब्रह्म तद्व्यतिरिक्तं सर्वमनित्यम्।

*nityavastvekaṁ brahma tadvyatiriktaṁ sarvamanityam*

अयमेव नित्यानित्यवस्तुविवेकः।

*ayameva nityānityavastuvivekaḥ*

विरागः कः ?

*virāgaḥ kaḥ ?*

इह-स्वर्गभोगेषु इच्छाराहित्यम्।

*iha-svargabhogeṣu icchārāhityam*

शमादि-साधन-संपत्तिः का ?

*śamādi-sādhana-sampattiḥ kā ?*

शमो दम उपरमस्तितिक्षा श्रद्धा समाधानं चेति।

*śamo dama uparamastitikṣā śraddhā samādhānaṁ ceti*

शमः कः ?

*śamaḥ kaḥ ?*

मनोनिग्रहः।

*manonigrahaḥ*

दमः कः ?

*damaḥ kaḥ ?*

चक्षुरादिबाह्येन्द्रियनिग्रहः ।

*cakṣurādibāhyendriyanigrahaḥ*

उपरमः कः ?

*uparamaḥ kaḥ ?*

स्वधर्मानुष्ठानमेव ।

*svadharmānuṣṭhānameva*

तितिक्षा का ?

*titikṣā kā ?*

शीतोष्णसुखदुःखादिसहिष्णुत्वम् ।

*śītoṣṇasukhaduḥkhādisahiṣṇutvam*

श्रद्धा कीदृशी ?

*śraddhā kīdṛśī ?*

**गुरुवेदान्तवाक्यादिषुविश्वासः श्रद्धा ।**

*guruvedāntavākyādiṣuviśvāsaḥ śraddhā*

**समाधानं किम् ?**

*samādhānaṁ kim ?*

**चित्तैकाग्रता ।**

*cittaikāgratā*

**मुमुक्षुत्वं किम् ?**

*mumukṣutvaṁ kim ?*

**मोक्षो मे भूयाद् इति इच्छा ।**

*mokṣo me bhūyād iti icchā*

**एतत् साधनचतुष्टयम् ।**

*etat sādhanacatuṣṭayam ।*

**ततस्तत्त्वविवेकस्याधिकारिणो भवन्ति ।**

*tatastattvavivekasyādhikāriṇo bhavanti ।*

## Chapter 2

॥ अथ व्यष्टि-विचारः ॥

*atha vyaṣṭi-vicāraḥ*

तत्त्वविवेकः कः ?

*tattvavivekaḥ kaḥ ?*

आत्मा सत्यं तदन्यत् सर्वं मिथ्येति ।

*ātmā satyaṁ tadanyat sarvaṁ mithyeti*

आत्मा कः ?

*ātmā kaḥ ?*

स्थूलसूक्ष्मकारणशरीराद्व्यतिरिक्तः पञ्चकोशातीतः सन् अवस्थात्रयसाक्षी सच्चिदानन्दस्वरूपः सन् यस्तिष्ठति स आत्मा ।

*sthūlasūkṣmakāraṇaśarīrādvyatiriktaḥ pañcakośātītaḥ san avasthātrayasākṣī saccidānandasvarūpaḥ san yastiṣṭati sa ātmā*

स्थूलशरीरं किम् ?

*sthūlaśarīraṁ kim ?*

पञ्चीकृतपञ्चमहाभूतैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगायतनं शरीरं अस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यतीति षड्विकारवदेतत्स्थूलशरीरम् ।

*pañcīkṛtapañcamahābhūtaiḥ kṛtaṁ satkarmajanyaṁ sukhaduḥkhādibhogāyatanaṁ śarīram asti jāyate vardhate vipariṇamate apakṣīyate vinaśyatīti ṣaḍvikāravadetatsthūlaśarīram*

सूक्ष्मशरीरं किम् ?

*sūkṣmaśarīraṁ kim ?*

अपञ्चीकृतपञ्चमहाभूतैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगसाधनं पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि पञ्चप्राणादयो मनश्चैकं बुद्धिश्चैका एवं सप्तदशकलाभिः सह यत्तिष्ठति तत्सूक्ष्मशरीरम् ।

*apañcīkṛtapañcamahābhūtaiḥ kṛtaṁ satkarmajanyaṁ sukhaduḥkhādibhogasādhanaṁ pañcajñānendriyāṇi pañcakarmendriyāṇi pañcaprāṇādayo manaścaikaṁ buddhiścaikā evaṁ saptadaśakalābhiḥ saha yattiṣṭhati tatsūkṣmaśarīram*

श्रोत्रं त्वक् चक्षू रसना घ्राणमिति पञ्चज्ञानेन्द्रियाणि ।

*śrotraṁ tvak cakṣū rasanā ghrāṇamiti pañcajñānendriyāṇi*

श्रोत्रस्य दिग्देवता ।

*śrotrasya digdevatā*

त्वचो वायुः ।

*tvaco vāyuḥ*

चक्षुषः सूर्यः ।

*cakṣuṣaḥ sūryaḥ*

रसनाया वरुणः ।

*rasanāyā varuṇaḥ*

घ्राणस्य अश्विनौ ।

*ghrāṇasya aśvinau*

इति ज्ञानेन्द्रियदेवताः ।

*iti jñānendriyadevatāḥ*

श्रोत्रस्य विषयः शब्दग्रहणम्।

*śrotrasya viṣayaḥ śabdagrahaṇam*

त्वचो विषयः स्पर्शग्रहणम्।

*tvaco viṣayaḥ sparśagrahaṇam*

चक्षुषो विषयो रूपग्रहणम्।

*cakṣuṣo viṣayo rūpagrahaṇam*

रसनाया विषयो रसग्रहणम्।

*rasanāyā viṣayo rasagrahaṇam*

घ्राणस्य विषयो गन्ध ग्रहणमिति।

*ghrāṇasya viṣayo gandha grahaṇamiti*

वाक्पाणिपादपायूपस्थानीति पञ्चकर्मेन्द्रियाणि।

*vākpāṇipādapāyūpasthānīti pañcakarmendriyāṇi*

वाचो देवता वह्निः।

*vāco devatā vahniḥ*

हस्तयोरिन्द्रः।

*hastayorindraḥ*

पादयोर्विष्णुः।

*pādayorviṣṇuḥ*

पायोर्मृत्युः।

*pāyormṛtyuḥ*

उपस्थस्य प्रजापतिः।

*upasthasya prajāpatiḥ*

इति कर्मेन्द्रियदेवताः।

*iti karmendriyadevatāḥ*

वाचो विषयो भाषणम् ।

*vāco viṣayo bhāṣaṇam*

पाण्योर्विषयो वस्तुग्रहणम् ।

*pāṇyorviṣayo vastugrahaṇam*

पादयोर्विषयो गमनम् ।

*pādayorviṣayo gamanam*

पायोर्विषयो मलत्यागः ।

*pāyorviṣayo malatyāgaḥ*

उपस्थस्य विषय आनन्द इति ।

*upasthasya viṣaya ānanda iti*

कारणशरीरं किम् ?

*kāraṇaśarīraṁ kim ?*

अनिर्वाच्यानाद्यविद्यारूपं शरीरद्वयस्य कारणमात्रं सत्स्वरूपाज्ञानं निर्विकल्पकरूपं यदस्ति तत्कारणशरीरम् ।

*anirvācyānādyavidyārūpaṁ śarīradvayasya kāraṇamātraṁ satsvarūpājñānaṁ nirvikalpakarūpaṁ yadasti tatkāraṇaśarīram*

अवस्थात्रयं किम् ?

*avasthātrayaṁ kim ?*

जाग्रत्स्वप्नसुषुप्त्यवस्थाः ।

*jāgratsvapnasuṣuptyavasthāḥ*

जाग्रदवस्था का ?

*jāgradavasthā kā ?*

श्रोत्रादिज्ञानेन्द्रियैः शब्दादि-विषयैश्च ज्ञायते इति या सा जाग्रदवस्था ।

*śrotrādijñānendriyaiḥ śabdādi-viṣayaiśca jñāyate iti yā sā jāgradavasthā*

स्थूलशरीराभिमानि आत्मा विश्व इत्युच्यते ।

*sthūlaśarīrābhimāni ātmā viśva ityucyate*

स्वप्नावस्था केति चेत् ?

*svapnāvasthā keti cet ?*

जाग्रदवस्थायां यद्दृष्टं यच्छ्रुतं तज्जनितवासनया निद्रासमये यः प्रपञ्चः प्रतीयते सा स्वप्नावस्था ।

*jāgradavasthāyāṁ yaddṛṣṭaṁ yacchrutaṁ tajjanitavāsanayā nidrāsamaye yaḥ prapañcaḥ pratīyate sā svapnāvasthā*

सूक्ष्मशरीराभिमानि आत्मा तैजस इत्युच्यते ।

*sūkṣmaśarīrābhimāni ātmā taijasa ityucyate*

अथ सुषुप्त्यवस्था का ?

*atha suṣuptyavasthā kā ?*

अहं किमपि न जानामि सुखेन मया निद्राऽनुभूयत इति सुषुप्त्यवस्था ।

*ahaṁ kimapi na jānāmi sukhena mayā nidrā'nubhūyata iti suṣuptyavasthā*

कारणशरीराभिमानि आत्मा प्राज्ञ इत्युच्यते ।

*kāraṇaśarīrābhimāni ātmā prājña ityucyate*

पञ्चकोशाः के ?

*pañcakośāḥ ke ?*

अन्नमयः प्राणमयो मनोमयो विज्ञानमय आनन्दमयश्चेति ।

*annamayaḥ prāṇamayo manomayo vijñānamaya ānandamayaśceti*

अन्नमयः कः ?

*annamayaḥ kaḥ ?*

अन्नरसेनैव भूत्वा अन्नरसेनैव वृद्धिं प्राप्य अन्नरूपपृथिव्यां यद्विलीयते तदन्नमयः कोशः स्थूलशरीरम् ।

*annarasenaiva bhūtvā annarasenaiva vṛuddhiṁ prāpya annarūpapṛuthivyāṁ yadvilīyate tadannamayaḥ kośaḥ sthūlaśarīram*

प्राणमयः कः ?

*prāṇamayaḥ kaḥ ?*

प्राणाद्याः पञ्चवायवः वागादीन्द्रियपञ्चकं प्राणमयः कोशः ।

*prāṇādyāḥ pañcavāyavaḥ vāgādīndriyapañcakaṁ prāṇamayaḥ kośaḥ*

मनोमयः कः ?

*manomayaḥ kaḥ ?*

मनश्च ज्ञानेन्द्रियपञ्चकं मिलित्वा यो भवति स मनोमयः कोशः ।

*manaśca jñānendriyapañcakaṁ militvā yo bhavati sa manomayaḥ kośaḥ*

विज्ञानमयः कः ?

*vijñānamayaḥ kaḥ ?*

बुद्धिर्ज्ञानेन्द्रियपञ्चकं मिलित्वा यो भवति स विज्ञानमयः कोशः।

*buddhirjñānendriyapañcakaṁ militvā yo bhavati sa vijñānamaḥ kośaḥ*

आनन्दमयः कः ?

*ānandamayaḥ kaḥ ?*

एवमेव कारणशरीरभूताविद्यास्थमलिनसत्वं प्रियादिवृत्तिसहितं सत् आनन्दमयः कोशः

*evameva kāraṇaśarīrabhūtāvidyāsthamalinasatvaṁ priyādivṛuttisahitaṁ sat ānandamayaḥ kośaḥ*

एतत् कोशपञ्चकम्।

*etat kośapañcakam*

मदीयं शरीरं मदीयाः प्राणाः मदीयं मनश्च मदीया बुद्धिः मदीयं अज्ञानमिति स्वेनैव ज्ञायते तद्यथा मदीयत्वेन ज्ञातं कटककुण्डलगृहादिकं स्वस्माद्भिन्नं तथा पञ्चकोशादिकं स्वस्माद्भिन्नं मदीयत्वेन ज्ञातमात्मा न भवति।

*madīyaṁ śarīraṁ madīyāḥ prāṇāḥ madīyaṁ manaśca madīyā buddhiḥ madīyam ajñānamiti svenaiva jñāyate tadyathā madīyatvena jñātaṁ kaṭakakuṇḍalagṛuhādikaṁ svasmādbhinnaṁ tathā pañcakośādikaṁ svasmādbhinnaṁ madīyatvena jñātamātmā na bhavati*

आत्मा तर्हि कः ?

*ātmā tarhi kaḥ ?*

सच्चिदानन्दस्वरूपः।

*saccidānandasvarūpaḥ*

सत् किम् ?

*sat kim ?*

कालत्रयेऽपि तिष्ठतीति सत्।

*kālatraye'pi tiṣṭhatīti sat*

चित् किम् ?

*cit kim ?*

ज्ञानस्वरूपः।

*Jñānasvarūpaḥ*

आनन्दः कः ?

*ānandaḥ kaḥ ?*

सुखस्वरूपः।

*sukhasvarūpaḥ*

एवं सच्चिदानन्दस्वरूपं स्वात्मानं विजानीयात् ॥

*evaṁ saccidānandasvarūpaṁ svātmānaṁ vijānīyāt*

# Chapter 3

॥ अथ समष्टि-विचारः ॥

*atha samaṣṭi-vicāraḥ*

अथ चतुर्विंशतितत्त्वोत्पत्तिप्रकारं वक्ष्यामः ।

*atha caturviṁśatitattvotpattiprakāraṁ vakṣyāmaḥ*

ब्रह्माश्रया सत्त्वरजस्तमोगुणात्मिकामाया अस्ति ।

*brahmāśrayā sattvarajastamoguṇātmikāmāyā asti*

तत आकाशः सम्भूतः ।

*tata ākāśaḥ sambhūtaḥ*

आकाशाद् वायुः ।

*ākāśād vāyuḥ*

वायोस्तेजः ।

*vāyostejaḥ*

तेजस आपः ।

*tejasa āpaḥ*

अद्भ्यः पृथिवी ।

*adbhyaḥ pṛuthivī*

एतेषां पञ्चतत्त्वानां मध्ये आकाशस्य सात्विकांशात् श्रोत्रेन्द्रियं सम्भूतम् ।

*eteṣāṁ pañcatattvānāṁ madhye ākāśasya sātvikāṁśāt śrotrendriyaṁ sambhūtam*

वायोः सात्विकांशात् त्वगिन्द्रियं सम्भूतम्।

*vāyoḥ sātvikāṁśāt tvagindriyaṁ sambhūtam*

अग्नेः सात्विकांशात् चक्षुरिन्द्रियं सम्भूतम्।

*agneḥ sātvikāṁśāt cakṣurindriyaṁ sambhūtam*

जलस्य सात्विकांशात् रसनेन्द्रियं सम्भूतम्।

*jalasya sātvikāṁśāt rasanendriyaṁ sambhūtam*

पृथिव्याः सात्विकांशात् घ्राणेन्द्रियं सम्भूतम्।

*pṛuthivyāḥ sātvikāṁśāt ghrāṇendriyaṁ sambhūtam*

एतेषां पञ्चतत्त्वानां समष्टि-सात्विकांशात् मनोबुद्ध्यहंकारचित्तान्तःकरणानि सम्भूतानि।

*eteṣāṁ pañcatattvānāṁ samaṣṭi-sātvikāṁśāt manobuddhyahaṅkāracittāntaḥkaraṇāni sambhūtāni*

संकल्पविकल्पात्मकं मनः।

*saṅkalpavikalpātmakaṁ manaḥ*

निश्चयात्मिका बुद्धिः।

*niścayātmikā buddhiḥ*

अहंकर्ता अहंकारः।

*ahaṅkartā ahaṅkāra*

चिन्तनकर्तृ चित्तम्।

*cintanakartṛ cittam*

मनसो देवता चन्द्रमाः।

*manaso devatā candramāḥ*

बुद्धेः ब्रह्मा।

*buddheḥ brahmā*

अहंकारस्य रुद्रः।

*ahaṅkārasya rudraḥ*

चित्तस्य वासुदेवः।

*cittasya vāsudevaḥ*

एतेषां पञ्चतत्त्वानां मध्ये आकाशस्य राजसांशात् वागिन्द्रियं सम्भूतम्।

*eteṣāṁ pañcatattvānāṁ madhye ākāśasya rājasāṁśāt vāgindriyaṁ sambhūtam*

वायोः राजसांशात् पाणीन्द्रियं सम्भूतम्।

*vāyoḥ rājasāṁśāt pāṇīndriyaṁ sambhūtam*

वह्नेः राजसांशात् पादेन्द्रियं सम्भूतम्।

*vahneḥ rājasāṁśāt pādendriyaṁ sambhūtam*

जलस्य राजसांशात् उपस्थेन्द्रियं सम्भूतम्।

*jalasya rājasāṁśāt upasthendriyaṁ sambhūtam*

पृथिव्याः राजसांशात् गुदेन्द्रियं सम्भूतम्।

*pṛuthivyāḥ rājasāṁśāt gudendriyaṁ sambhūtam*

एतेषां समष्टि-राजसांशात् पञ्चप्राणाः सम्भूताः।

*eteṣāṁ samaṣṭi-rājasāṁśāt pañcaprāṇāḥ sambhūtāḥ*

एतेषां पञ्चतत्त्वानां तामसांशात् पञ्चीकृतपञ्चतत्त्वानि भवन्ति।

*eteṣāṁ pañcatattvānāṁ tāmasāṁśāt pañcīkṛutapañcatattvāni bhavanti*

पञ्चीकरणं कथमिति चेत्?

*pañcīkaraṇaṁ kathamiti cet ?*

एतेषां पञ्चमहाभूतानां तामसांशस्वरूपं एकमेकं भूतं द्विधा विभज्य

एकमेकमर्धं पृथक् तूष्णीं व्यवस्थाप्य

अपरमपरमर्धं चतुर्धा विभज्य

स्वार्धमन्येषु अर्धेषु स्वभागचतुष्टयसंयोजनं कार्यम् ।

*eteṣāṁ pañcamahābhūtānāṁ tāmasāṁśasvarūpam ekamekaṁ bhūtaṁ dvidhā vibhājya*
*ekamekamardhaṁ pṛuthak tūṣṇīṁ vyavasthāpya*
*aparamaparamardhaṁ caturdhā vibhājya*
*svārdhamanyeṣu ardheṣu svabhāgacatuṣṭayasaṁyojanaṁ kāryam*

तदा पञ्चीकरणं भवति ।

*tadā pañcīkaraṇaṁ bhavati*

एतेभ्यः पञ्चीकृतपञ्चमहाभूतेभ्यः स्थूलशरीरं भवति ।

*etebhyaḥ pañcīkṛutapañcamahābhūtebhyaḥ sthūlaśarīraṁ bhavati*

एवं पिण्डब्रह्माण्डयोरैक्यं सम्भूतम् ।

*evaṁ piṇḍabrahmāṇḍayoraikyaṁ sambhūtam*

# Chapter 4

॥ अथ ऐक्य-विचारः ॥

*atha aikya-vicāraḥ*

स्थूलशरीराभिमानि जीवनामकं ब्रह्मप्रतिबिम्बं भवति ।

*sthūlaśarīrābhimāni jīvanāmakaṁ brahmapratibimbaṁ bhavati*

स एव जीवः प्रकृत्या स्वस्मात् ईश्वरं भिन्नत्वेन जानाति ।

*sa eva jīvaḥ prakṛtyā svasmāt īśvaraṁ bhinnatvena jānāti*

अविद्योपाधिः सन् आत्मा जीव इत्युच्यते ।

*avidyopādhiḥ san ātmā jīva ityucyate*

मायोपाधिः सन् आत्मा ईश्वर इत्युच्यते ।

*māyopādhiḥ san ātmā īśvara ityucyate*

एवं उपाधिभेदात् जीवेश्वरभेददृष्टिः यावत् पर्यन्तं तिष्ठति तावत् पर्यन्तं

जन्ममरणादिरूपसंसारो न निवर्तते ।

तस्मात् कारणात् न जीवेश्वरयोर्भेदबुद्धिः स्वीकार्या ।

*evam upādhibhedāt jīveśvarabhedadṛuṣṭiḥ yāvat paryantaṁ tiṣṭhati tāvat paryantaṁ janmamaraṇādirūpasaṁsāro na nivartate*
*tasmāt kāraṇāt na jīveśvarayorbhedabuddhiḥ svīkāryā*

ननु साहङ्कारस्य किञ्चिज्ज्ञस्य जीवस्य निरहंकारस्य सर्वज्ञस्य ईश्वरस्य तत्त्वमसीति

महावाक्यात्कथमभेदबुद्धिः स्यादुभयोः विरुद्धधर्माक्रान्तत्वात् ।

*nanu sāhaṅkārasya kiñcijjñasya jīvasya*

*nirahaṅkārasya sarvajñasya īśvarasya tattvamasīti*
*mahāvākyātkathamabhedabuddhiḥ syādubhayoḥ viruddhadharmākrāntatvāt*

इति चेन्न ।

*iti cenna*

स्थूलसूक्ष्मशरीराभिमानि त्वम्पदवाच्यार्थः ।

*sthūlasūkṣmaśarīrābhimāni tvampadavācyārthaḥ*

उपाधिविनिर्मुक्तं समाधिदशासम्पन्नं शुद्धं चैतन्यं त्वम्पदलक्ष्यार्थः ।

*upādhivinirmuktaṁ samādhidaśāsampannaṁ śuddhaṁ caitanyaṁ tvampadalakṣyārthaḥ*

एवं सर्वज्ञत्वादिविशिष्ट ईश्वरः तत्पदवाच्यार्थः ।

*evaṁ sarvajñatvādiviśiṣṭa īśvaraḥ tatpadavācyārthaḥ*

उपाधिशून्यं शुद्धचैतन्यं तत्पदलक्ष्यार्थः ।

*upādhiśūnyaṁ śuddhacaitanyaṁ tatpadalakṣyārthaḥ*

एवं च जीवेश्वरयोः चैतन्यरूपेणाऽभेदे बाधकाभावः ।

*evaṁ ca jīveśvarayoḥ caitanyarūpeṇā'bhede bādhakābhāvaḥ*

एवं च वेदान्तवाक्यैः सद्गुरूपदेशेन च सर्वेष्वपि भूतेषु येषां ब्रह्मबुद्धिरुत्पन्ना ते जीवन्मुक्ता इत्यर्थः ।

*evaṁ ca vedāntavākyaiḥ sadgurūpadeśena ca sarveṣvapi bhūteṣu yeṣāṁ brahmabuddhirutpannā te jīvanmuktā ityarthaḥ*

# Chapter 5

॥ अथ ज्ञानफलं विचारः ॥

*atha jñānaphalaṁ vicāraḥ*

जीवन्मुक्तः कः ?

*jīvanmuktaḥ kaḥ ?*

यथा देहोऽहं पुरुषोऽहं ब्राह्मणोऽहं शूद्रोऽहमस्मीति दृढनिश्चयः तथा नाहं ब्राह्मणो न शूद्रो न पुरुषः किन्तु असंगः सच्चिदानन्दस्वरूपः प्रकाशरूपः सर्वान्तर्यामि चिदाकाशरूपोऽस्मीति दृढनिश्चयरूपः अपरोक्षज्ञानवान् जीवन्मुक्तः।

*yathā deho'haṁ puruṣo'haṁ brāhmaṇo'haṁ śūdro'hamasmīti dṛuḍhaniścayaḥ tathā nāhaṁ brāhmaṇo na śūdro na puruṣaḥ kintu asaṅgaḥ saccidānandasvarūpaḥ prakāśarūpaḥ sarvāntaryāmi cidākāśarūpo'smīti dṛuḍhaniścayarūpaḥ aparokṣajñānavān jīvanmuktaḥ*

ब्रह्मैवाहमस्मि इत्यपरोक्षज्ञानेन निखिलकर्मबन्ध विनिर्मुक्तः स्यात्।

*brahmaivāhamasmi ityaparokṣajñānena nikhilakarmabandha vinirmuktaḥ syāt*

कर्माणि कतिविधानि सन्ति इति चेत् ?

*karmāṇi katividhāni santi iti cet ?*

आगामिसञ्चितप्रारब्धभेदेन त्रिविधानि सन्ति।

*āgāmisañcitaprārabdhabhedena trividhāni santi*

आगामि कर्म किम् ?

*āgāmi karma kim*

ज्ञानोत्पत्यनन्तरं ज्ञानिदेहकृतं पुण्यपापरूपंकर्म यदस्ति तत् आगामि इत्यभिधीयते ।

*jñānotpatyanantaraṁ jñānidehakṛutaṁ puṇyapāparūpaṅkarma yadasti tat āgāmi ityabhidhīyate*

सञ्चितं कर्म किम् ?

*sañcitaṁ karma kim ?*

अनन्तकोटिजन्मनां बीजभूतं सत् यत्कर्मजातं पूर्वार्जितं तिष्ठति तत्सञ्चितं ज्ञेयम् ।

*anantakoṭijanmanāṁ bījabhūtaṁ sat yatkarmajātaṁ pūrvārjitaṁ tiṣṭhati tatsañcitaṁ jñeyam*

प्रारब्धं कर्म किमिति चेत् ?

*prārabdhaṁ karma kimiti cet ?*

इदं शरीरमुत्पाद्य इहलोके एवं सुखदुःखादिप्रदं यत्कर्म तत्प्रारब्धम् । भोगेन नष्टं भवति ।

*idaṁ śarīramutpādya ihaloke evaṁ sukhaduḥkhādipradam yatkarma tatprārabdhaṁ*

*bhogena naṣṭaṁ bhavati*

प्रारब्धकर्मणां भोगादेव क्षय इति ।

*prārabdhakarmaṇāṁ bhogādeva kṣaya iti*

सञ्चितं कर्म ब्रह्मैवाहमस्मीति निश्चयात्मकज्ञानेन नश्यति ।

*sañcitaṁ karma brahmaivāhamasmīti niścayātmakajñānena naśyati*

आगामिकर्म अपि ज्ञानेन नश्यति । किंच आगामिकर्मणां नलिनीदलगतजलवत् ज्ञानिनां सम्बन्धो नास्ति ।

*āgāmikarma api jñānena naśyati*

*kiñca āgāmikarmaṇāṁ nalinīdalagatajalavat jñāninām sambandho nāsti*

किञ्च ये ज्ञानिनं स्तुवन्ति भजन्ति अर्चयन्ति तान्प्रति ज्ञानिकृतं आगामि पुण्यं गच्छति ।

*kiñca ye jñāninaṁ stuvanti bhajanti arcayanti tānprati jñānikṛutam āgāmi puṇyaṁ gacchati*

ये ज्ञानिनं निन्दन्ति द्विषन्ति तान्प्रति ज्ञानिकृतं सर्वमागामि क्रियमाणं यद्वाच्यं कर्म पापात्मकं तद्गच्छति ।

*ye jñāninaṁ nindanti dviṣanti tānprati jñānikṛutaṁ sarvamāgāmi kriyamāṇaṁ yadvācyaṁ karma pāpātmakaṁ tadgacchati*

सुहृदः पुण्यकृत्यं दुर्हृदः पापकृत्यं गृह्णन्ति ।

*suhṛdaḥ puṇyakṛtyaṁ durhṛdaḥ pāpakṛtyaṁ gṛhṇanti*

तथा च आत्मवित्संसारं तीर्त्वा ब्रह्मानन्दमिहैव प्राप्नोति ।

*tathā ca ātmavitsaṁsāraṁ tīrtvā brahmānandamihaiva prāpnoti*

तरति शोकं आत्मवित् इति श्रुतेः ।

*tarati śokam ātmavit iti śruteḥ*

तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा
ज्ञानसम्प्राप्तिसमये मुक्तोऽसौ विगताशयः ॥

इति स्मृतेश्च ।

*tanuṁ tyajatu vā kāśyāṁ śvapacasya gṛuhe'thavā*
*jñānasamprāptisamaye mukto'sau vigatāśayaḥ*
*iti smṛuteśca*

इति तत्त्वबोधप्रकरणं समाप्तम् ॥

*iti tattvabodhaprakaraṇaṁ samāptam*

ॐ तत्सत्

*om tatsat*

### *Key to transliteration and pronunciation of Sanskrit letters*

Sanskrit is a highly phonetic language and therefore accuracy in the pronunciation of the letters is very important. A change in the pronunciation could change the meaning of the word itself. For those who are not familiar with the *Dēvanāgarī* script, the International Alphabet of Sanskrit Transliteration is a guide to the correct pronunciation of the Sanskrit letters.

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अ | a | fun | च | ca | chunk 2 | य | ya | loyal |
| आ | ā | father | छ | cha | match *2 | र | ra | red |
| इ | i | it | ज | ja | jump 2 | ल | la | luck |
| ई | ī | feet | झ | jha | hedgehog *2 | व | va | virtue |
| उ | u | full | त्र | tra | three 2ट ṭa | श | śa | sure |
| ऊ | ū | pool | ठ | tha | ant-hill *3 | ष | ṣa | shun |
| ऋ | ṛ | rhythm | ड | ḍa | duck *3 | स | sa | sir |
| ॠ | ṝ | marine | ढ | ḍha | godhead *3 | ह | ha | hum |
| ऌ | ḷ | revelry | ण | ṇa | thunder *3 | क्ष | kṣa | worksheet |
| ए | e | play | त | ta | (close to) think *4 | ज्ञ | jña | * |
| ऐ | ai | aisle | थ | tha | (close to) pathetic *4 | ळ | (close to) world | * |
| ओ | o | go | द | da | (close to) that*4 | ऽ | ' | unpronounced |
| औ | au | cow | ध | dha | (close to) breathe *4 | | | अ(a) |
| अं | aṁ | ** | न | na | numb *4 | ऽऽ | " | unpronounced |
| अः | aḥ | *** | प | pa | purse 5 | | | आ(ā) |
| क | ka | Seek 1 | फ | pha | sapphire *5 | | | |
| ख | kha | blockhead*1 | ब | ba | but 5 | | | |
| ग | ga | get 1 | भ | bha | abhor 5 | | | |
| घ | gha | log-hut * 1 | म | ma | mother 5 | | | |
| ङ | ṅa | sing 1 | | | | | | |

* No English equivalent ** Nasalisation of preceding vowel *** Aspiration of preceding vowel.

1. Guttural – Pronounced from throat
2. Palatal - Pronounced from palate
3. Lingual - Pronounced from cerebrum
4. Dental - Pronounced from teeth
5. Labial- - Pronounced from lips.

The 5th letter of each of the above class – called nasals – is also pronounced nasally.